दन्ताश्चलन्ति वेष्टेभ्यस्तालु चाप्यवदीर्य्यते ।
दन्तमांसानि पच्यन्ते मुखञ्च परिदुष्यते ॥
यस्मिन् स सर्व्वजो व्याधिर्मन्दाच्छैशिरसंज्ञितः ॥५॥
दन्तमांसानि शीर्य्यन्ते यस्मिन् ष्ठीवति चाप्यसृक् ।
पित्तासृक्कफजो व्याधिर्ज्ञेयः परिदरो हि सः ॥६॥
वेष्टेषु दाहः पाकश्च ताभ्यां दन्ताश्चलन्ति च ।
आघट्टिताः प्रस्रवन्ति शोणितं दन्तवेदना ॥
आध्मायन्ते स्रुते रक्ते मुखं पूति च जायते ।
यस्मिन् सोपकुशो नाम पित्तरक्तकृतो गदः ॥७॥
घृष्टेषु दन्तमांसेषु संरम्भो जायते महान् ।
भवन्ति दन्ताश्च चलाः स वैदर्भोऽभिघातजः ॥८॥
मारुतेनाधिको दन्तो जायते तीव्रवेदनः ।
खलिवर्द्धनसंज्ञोऽसौ जाते रुक् च प्रशाम्यति ॥९॥
शनैः शनैः प्रकुरुते वायुर्दन्तसमाश्रितः ।
करालान् विकटान् दन्तान् करालो न स
सिध्यति ॥ १० ॥
हानव्ये पश्चिमे दन्ते महान् शोथो महारुजः ।
लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसकः ॥ ११ ॥
दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः ।
दीर्य्यमाणेष्विव रुजा यस्य दन्तेषु जायते ॥
दालनो नाम स व्याधिः सदागतिनिमित्तजः ॥१२॥
कृष्णश्छिद्रश्चलः स्रावी ससंरम्भो महारुजः ।
अनिमित्तरुजो वातात् स ज्ञेयः कृमिदन्तकः ॥१३॥
वक्रं वक्रं भवेद्यस्य दन्तभङ्गश्च जायते ।
कफवातकृतो व्याधिः स भञ्जनकसंज्ञितः ॥ १४ ॥
शीतरूक्षप्रवाताम्लस्पर्शानामसहा द्विजाः ।
पित्तमारुतकोपेन दन्तहर्षः स नामतः ॥ १५ ॥
(दन्तमांसैर्मलसावैर्वाह्याल्लः श्वयथुर्गुरुः ।
सदाहरुक्स्रवेद्भिन्नः पूयास्रं दन्तविद्रधिः ॥)
मलो दन्तगतो यस्तु कफमारुतशोषितः ।
शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा ॥ १६ ॥
कपालेष्विव दीर्य्यत्सु दन्तानां सैव शर्करा ।
कपालिकेति पठिता सदा दन्तविनाशिनी ॥१७॥
योऽसृङ्मिश्रेण पित्तेन दग्धो दन्तस्त्वशेषतः ।
श्यावतां नीलतां वापि गतः स श्यावदन्तकः ॥”१८
इति माधवकरः ॥

दन्तकः, पुं, (दन्त एव । स्वार्थे कन् ।) पर्व्वत-शृङ्गम् । नागदन्तः । इति हेमचन्द्रः । ४ । १०० ॥ (दन्तः । इति व्युत्पत्तिलब्धोऽर्थः ॥ त्रि, दन्तेषु प्रसितः । दन्त+“स्वाङ्गेभ्यः प्रसिते । ५ । २ । ६६ । इति कन् ।)

दन्तकर्षणः, पुं, (दन्तान् कर्षतीव यः । कृष् + ल्युः ।) जम्बीरः । इति शब्दरत्नावली ॥

दन्तकाष्ठं, क्ली, (दन्तधावनार्थं यत् काष्ठम् ।) विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥ दन्तधावनार्थकाष्ठम् । तद्यथा नरसिंहपुराणे ।
“दन्तकाष्ठस्य वक्ष्यामि समासेन प्रशस्तताम् ।
सर्व्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः ।”
महाभारते ।
“तिक्तं कषायं कटुकं सुगन्धि कण्टकान्वितम् ।
क्षीरिणो वृक्षगुल्माद्या भक्षयेद्दन्तधावनम् ॥”
निषिद्धकाष्ठानि यथा,—
“गुवाकतालहिन्तालास्तथा ताड़ी च केतकी ।
खर्ज्जूरनारिकेलौ च सप्तैते तृणराजकाः ॥
तृणराजशिरापत्रैर्यः कुर्य्याद्दन्तधावनम् ।
तावद्भवति चाण्डालो यावद्गङ्गां न पश्यति ॥”
तस्य स्थौल्यं परिमाणञ्चाह विष्णुः ।
“कनिष्ठाग्रसमं स्थौल्यं सकूर्च्चं द्वादशाङ्गुलम् ।
प्रातर्भूत्वा च यतवाक् भक्षयेद्दन्तधावकम् ॥”
मरीचिः ।
“द्वादशाङ्गुलन्तु विप्राणां क्षत्त्रियाणां नवाङ्गुलम् ।
अष्टाङ्गुलञ्च वैश्यानां शूद्राणान्तु षडङ्गुलम् ॥
चतुरङ्गुलमानेन नारीणां विधिरुच्यते ।
अन्तरप्रभवाणाञ्च षड़ङ्गुलमुदाहृतम् ॥”
इत्याह्निकतत्त्वम् ॥

दन्तकाष्ठकं, क्ली, (ह्रस्वं काष्ठं काष्ठकम् । दन्तधावनयोग्यं काष्ठकम् ।) आहुल्यवृक्षः । इति राजनिर्घण्टः ॥

दन्तच्छदः, पुं, (दन्ताश्छाद्यन्तेऽनेनेति । छद संवरणे +णिच् + “पुंसि संज्ञायां घः प्रायेण ।” ।३।३। ११८ । इति घः । “छादेर्घेऽद्व्युपसर्गस्य ।” ६ । ४।९६। इति ह्रस्वः ।) ओष्ठः । इति हलायुधः ॥ (यथा, ऋतुसंहारे हेमन्तवर्णनायाम् । १२ ।
“दन्तच्छदैर्दन्तविघातचिह्नैः
स्तनैश्च पाण्यग्रकृताभिलेखैः ।
संसूच्यते निर्दयमङ्गनानां
रतोपभोगो नवयौवनानाम् ॥”)

दन्तच्छदोपमा, स्त्री, (दन्तच्छदस्य ओष्ठस्य उपमा सादृश्यं यत्र । यद्वा, उपमीयतेऽनयेति उपमा । दन्तच्छदस्य उपमा सादृश्यसाधनम् ।) बिम्बी । इति राजनिर्घण्टः ॥

दन्तधावनं, क्ली, (दन्तानां धावनम् ।) दन्तमार्ज्जनम् । (दन्तानां धावनं यस्मात् ।) दन्तकाष्ठम् । यथा, गारुड़े २१४ अध्याये ।
“उषःकाले तु सम्प्राप्ते शौचं कृत्वा यथार्थवत् ।
ततः स्नानं प्रकुर्व्वीत दन्तधावनपूर्व्वकम् ॥
मुखे पर्य्युषिते नित्यं भवत्यप्रयतो नरः ।
तस्मात् सर्व्वप्रयत्नेन भक्षयेद्दन्तधावनम् ॥
कदम्बबिल्वखदिरकरवीरवटार्ज्जुनाः ।
तगरं बृहती जातिकरञ्जार्कातिमुक्तकाः ॥
जम्बूमधूकापामार्गशिरीषोडुम्बरासनाः ।
क्षीरकण्टकिवृक्षाद्याः प्रशस्ता दन्तधावने ॥
कटुतिक्तकषायाश्च धनारोग्यसुखप्रदाः ।
प्रक्षाल्य भुक्त्वा च शुचौ देशे त्यक्त्वा तदाचमेत् ॥
अमावास्यां तथा षष्ठ्यां नवम्यां प्रतिपद्यपि ।
वर्ज्जयेद्दन्तकाष्ठन्तु तथैवार्कस्य वासरे ॥
अभावे दन्तकाष्ठस्य निषिद्धायां तथा तिथौ ।
अपां द्वादशगण्डूषैः कुर्व्वीत मुखशोधनम् ॥”
दन्तशुद्धिः । तस्य विधिर्यथा,—
“प्रातर्भुक्त्वा च म्रदयं कषायकटुतिक्तकम् ।
भक्षयेद्दन्तपवनं दन्तमांसान्यबाधयन् ॥”*॥
तस्य काष्ठानि यथा,—
“कैरय्य करवीरार्ककरञ्जबकुलाशनान् ।
दन्तकाष्ठार्थमन्ये तु सर्व्वान् कण्टकिनोऽब्रुवन् ॥
खदिरश्च कदम्बश्च करञ्जश्च वटस्तथा ।
तिन्तिड़ी वेणुपृष्ठञ्च आम्रनिम्बौ तथैव च ॥
अपामार्गश्च बिल्वश्च अर्कश्चोडुम्बरस्तथा ।
एते प्रशस्ताः कथिता दन्तधावनकर्म्मणि ॥”*॥
तस्य निषिद्धकाष्ठानि यथा,—
“गुवाकतालहिन्तालखर्ज्जूरैः केतकीयुतैः ।
नारिकेलेन ताभ्यां च न कुर्य्याद्दन्तधावनम् ॥”*॥
तस्य दिग्भेदेन शुभाशुभफलं यथा,—
“मृत्युः स्याद्दक्षिणास्येन पश्चिमास्येन चामयः ।
पूर्व्वास्येनोत्तरास्येन सम्पदो दन्तधावनात् ॥”*॥
तस्य तिथिविशेषे निषेधो यथा,—
“प्रतिपद्दर्शषष्ठीषु नवम्येकादशीषु च ।
दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम् ॥”*॥
दन्तघर्षणानन्तरं चक्षुःसेचनं यथा,—
“दन्तानह्नमधो घृष्ट्वा प्रातः सिञ्चेच्च लोचने ।
तोयपूर्णमुखस्तेन हरिरास्य प्रसीदति ॥”*॥
रोगविशेषे दन्तकाष्ठवर्ज्जनं यथा,—
“अहिती कर्णशूली च दन्तरोगी नवज्वरी ।
शोषी कासी च मूर्च्छार्त्तो दन्तकाष्ठं विवर्ज्जयेत् ॥”*॥
तस्य गुणा यथा,—
“निहन्ति वक्त्रवैरस्यं जिह्वादन्ताश्रितं मलम् ।
आरोग्यं रुचिमाधत्ते सद्यो दन्तविशोधनम् ॥”
इति राजवल्लभः ॥ * ॥
“कृतशौचस्ततः प्राज्ञः कुर्य्याद्दन्तस्य धावनम् ।
जिह्वाया आर्ज्जनञ्चापि दलाच्छदवादिभिः ॥
दक्षिणाभिमुखो भूत्वा पश्चिमाभिमुखस्तथा ।
न दन्तधावनं कुर्य्यात् कुर्य्याच्चेन्नारकी भवेत् ॥
मध्यमानामिकाभ्याञ्च वृद्धाङ्गुष्ठेन च द्विजः ।
दन्तस्य धावनं कुर्य्यात् तर्ज्जन्या न कदाचन ॥
अश्वत्थवटबिल्वानां धात्र्याः काष्ठिकया बुधः ।
न दन्तधावनं कुर्य्यात्तथैवेक्षुरसस्य च ॥
नित्यक्रियाफलं प्रेप्सुस्तया दन्तधावनम् ।
प्रभाते कुरुते प्राज्ञः सूर्य्योदयविवर्ज्जिते ॥
सूर्य्योदये द्विजश्रेष्ठ ! यः कुर्य्याद्दन्तधावनम् ।
नित्यक्रियाफलं तस्य सर्व्वमेव विनश्यति ॥
यः स्नानसमये कुर्य्यात् जैमिने ! दन्तधावनम् ।
निराशाः पितरो यान्ति तस्य देवाः सुरर्षभः ॥
दन्तस्य धावनं कुर्य्याद्यो मध्याह्नापराह्णयोः ।
तस्य पुष्पं न गृह्णन्ति देवताः पितरो जलम् ॥
स्नानकाले पुष्करिण्यां यः कुर्य्याद्दन्तधावनम् ।
तावच्छ्रेयः स चाण्डालो यावद्गङ्गां न पश्यति ॥
भगवत्युदिते सूर्य्ये यः कुर्य्याद्दन्तधावनम् ।
तद्दन्तकाष्ठे पितरो भुक्त्वा गच्छन्ति दुःखिनः ॥
उपवासदिने विप्र ! पितृश्राद्धदिने तथा ।
न च तत्फलमाप्नोति दन्तधावनकृन्नरः ॥
प्रभाते मार्ज्जयेद्दन्तान् वाससा रसनां तथा ।
कुर्य्याद्द्वादश विप्रेन्द्र ! कवलानि जलैर्बुधः ॥
उपवासे पितृश्राद्धे विधिनानेन जैमिने ! ।
दन्तधावनजन्मत्वं संपूर्णं लभते फलम् ॥”
इति पाद्मे क्रियायोगसारः ॥